न्यत्रत्ववनथेत्यज्यतेअतएवज्ञायतेसोमयाजिनोग्निचितश्चैतदेवसंचयनांतंवि
धानंनाधिकमितियतुपरैरुक्तंजोषणांतंसोमयाजिनःचित्यंतमग्निचितइतित
दाचार्यस्यनेष्टंअतएवनऽदृष्टिंकात्यायनादिनिरपितन्नविहितंनवनवंबहु
वैवजिसनेयिग्निवछिनद्रुनलोष्टविति॥वस्वयमावर्यतेबहुत्वंवास्वगृह्यो॰ १००
क्तमितिवचनान्नन्नकार्यं॥नासि॰स्रुवौ॥द्विवचनंविकृत्यपेक्षंअध्वर्युवचाद्

ग्निहोत्रार्थंवाद्वितीयं॥नित्वा॰वैकं॥एकश्चेत्स्रुवस्तथासतितंस्रुवंनित्वानासि॰
काद्वयेयोजयेत्॥कर्ण॰रलो॥द्विवचनंश्रुवंवत्॥नित्वावैकंश्रुवंवदिति॥उद॰पा
त्री॥यस्याहवींष्यासाद्यंतेसापात्री॥सम॰मसं॥यस्मिन्नुपक्षीनार्थंमवताऽडाधी
यतेसवमसःसमवत्तधानःतंवोदरेयोजयेत्॥उप॰त्राम्या॥ऊर्वीरूर्ध्वप्रदेशउ
पस्थः॥अर॰उर्वी॥उल्ल॰घयोः॥यथासंख्यं॥पाद॰श्चर्वी॥इदमपिद्विवचनंविकृ
त्यपेक्षं॥त्वित्वा॰वैकं॥एकंचेल्लुप्तंत्वित्वापादयोर्येजियेतअनिर्दिष्टानितुपात्राण्य
नियतकालानिअनियतदेशानिभवंति॥आसे॰यंति॥यानिपात्राण्यासेचनवंति
बिलवंतिषदाज्यधारणेसमर्थानीत्यर्थः तानिषदाज्यस्यपूरयंतिबहुत्वंच
कर्तुरनियमार्थंपूरयित्वापूरयित्वाततोयोजयेत्कुतएतन्नघभेत्तिसादनेतथा

ROYAL ASIATIC SOCIETY OF GREAT BRITAIN & IRELAND LIBRARY BOMBAY BRANCH

दृष्ट्वात्॥अमा०वेति॥दर्शऽपत्ये पुत्रःअमाकुर्वीतआत्मनउपयोगार्थंसंगृह्णीया
दित्यर्थःतेनगृहान्नानयेति।लौ०।लालं॥संगृह्णीयात्अन्यानिसर्वाण्यायुधा
नियोजयेत्॥अनु०स्वेति॥वपामुत्खिद्यजेतस्यशिरोनुरक्वप्रच्छादयेत्॥अग्नेरिस
वाऽउत्खिद्यक्वचनलुठेदनमेवकार्यंनान्यत्वाश्वकंतंत्रमित्येवमर्थंसंज्ञपनंत्वर्थत्रा
सं॥हक्का०सर्वं॥ततोहक्कायुद्दस्यैतस्यपाल्योरादध्यादतीस्त्वादक्षिलेपालौदक्षि
णंहक्कंसव्येसव्यंसक्थन्नंत्रः॥हृद०दयंहृदयमुद्दस्यहृदयआदध्यात्लौ॥पिंड्यो०
वै०के॥एकेपिंड्योवपाएयोरादध्यादितिसाजः।एवंहक्कयोःपिंड्योश्चसमुच्चयःहक्का०ये
केएकेहक्कानांवेपिंड्यावादध्या दितिसाजःअनुस्तरणीनित्यावेतद्धक्का १०१
एवारोनोपपद्यतेतस्मादनिस्थेतिमन्यामहेअनुस्तरण्यएवारइतिवक्ष्यतेहक्काएवा

रइतिवचनंपिंड्योहक्काधानस्थानेआधानसिध्यर्थंतेनपाल्योरितिसिद्धं।अथकिंद्वे
पिंड्यौअन्नपिंड्यावित्येकेसक्तुपिंड्यावित्यपरेउक्तंचकात्यायनेनअथयदानुस्तर
णीनास्तितदासक्तुरुदीक्षितस्थानेकुर्यादितिपिंडीग्रहणमुपलक्षणंतेनवपादिस
र्वंपिण्डकार्यंसक्तुभिरेवनिवर्त्तयेदित्येकेअत्रपक्षेवपास्थानेअध्वर्युःहक्कस्थानेपिं
ड्यौअन्नपिंड्यापितत्तदंगसदृशानिसक्तुभिरेवकार्याणि।।सर्वं०व्यतै।अनुस्तरण्या
श्चर्मेष्टथकक्षसंसर्वमितिवचनादखंडितानेवयथांगमितिजैतस्ययद्यदंगंपादा
दितस्मिंस्तस्मिन्नंगेपशोरविद्यद्यदंगंयथानवेत्तथानिक्षिप्यतस्याएकत्वमर्पणाय
ज्ञायतेतदग्नाविस्त्वाघ्राणेचमसमनुमंत्रयेतयःपूर्वंनिहितः॥सव्यं०इति॥दक्षिण
मितिसव्यनिहस्थंतज्जानुनिपात्यदक्षिणंन्यायाज्याऽतोजुजयाच्चतुर्निःजानु

निपातनसमुच्चयोत्तानत्वाविरोधेनकर्त्तव्यंसर्वत्रन्यग्भावेवनादिग्रहणकारेण
दोषस्योक्तत्वात्आज्याजतिवचनंतत्रनिहस्यर्थमिष्यतेहोमार्थमन्यःस्रुवःकार्यः
पूर्वस्ययोजितत्वात्॥पंच०हेति॥अेतस्यहृदयेपंचभ्योजुहूयात्अस्मादि
तिमंत्रेणपंचभ्योमितिवचनमिमामपिजान्वाद्यजुहूयादित्येवमर्थंअेतयहणम
नर्थकंपश्यामःयथाहुःक्षीरेदस्तेजुहूमिसुरेअेतस्येतिगम्यतेअेताधिकारादेव
मिहापिगम्यतेवउच्यतेअेतयहणंसर्वस्यापिअेतस्येमांपंचभ्योजुहूयान्नाहिताग्ने
रेवंसेवमर्थंएतदुक्तंभवतियस्मयस्यअेतस्यस्मृतौदहनंविहितंतंअेतमनेनवि
धिनादहेदितिविशेषंतूत्तरत्रवक्ष्यामःअसावित्यस्यस्थानेअेतस्यनामसंबुध्या १०२
निर्दिशेत्॥२॥अेष्य०अेति॥अथपरिकर्मिणःकर्त्तअेष्यतियुगपदेवसर्वनिम्नान्

ये

प्रज्वालयतेतितेचतथाकुर्युअत्रविज्ञानमाह॥आहु०पुत्रः॥आहवनीयश्चेदाहि
ताग्निःशरीरंप्रथमंप्राप्नुयात्स्वर्गलोकएनमाहिताग्निंप्रापदितिजानीयात्राऽस्यति
ऋद्धिंनाऽस्यतिअसावाहिताग्निरमुत्रस्वर्गएवमयंपुत्रःअस्मिन्मनुष्यलोकेऋद्धिं
प्राप्स्यतीतिविद्यात्एवमुत्तरत्रापियोज्यंअनेनानुष्ठितस्यकर्मणःफलविज्ञानमु
क्तंनतुपूर्वप्राप्तेरिदंफलं॥गार्हपुत्रः॥गार्हपत्यस्यपूर्वप्राप्तावाहिताग्निरंतरिक्ष
लोकंप्राप्यतत्रास्तेतिपुत्रस्तस्मिन्नितिविद्यात्॥दक्षि०पुत्रः॥दक्षिणाग्नेःपूर्वप्रा
प्तौक्षिप्रमेवोत्पद्यब्रह्मलोकंप्राप्नोतिमनुष्यलोकेप्राहिताग्निःपुत्रश्चास्मिन्लोके
ब्रह्मलोकवतीतिविद्यात्॥युग०दंति॥यदिसर्वेअग्नयोयुगपच्छरीरंप्राप्नुयुस्तदा
हिताग्नेर्विशिष्टेस्थानेअस्मुत्क्रष्टमद्धिंवदंतिब्रह्मवादिनःपुत्राणांचास्मिन्लोके

ग०स्त्र०१० परामर्शिवदंति॥तंदु०मानं॥तंयज्ञेतंप्रतिकर्मतिरप्यस्तीतिज्ञापनार्थंतिनजैषंद्
त्वासिग्वातादिलौकिकंकुर्यादित्यमानंजेतमनुमंत्रयतेत्रिर्जेत्रिर्पथिनिःपूर्वं॥
न्निरितिसमानंप्रागुक्तेनानुवर्णेनजेत्रिर्जेत्रिर्पथिनिःपूर्वंन्निरितिपंचानांतत्तीया
मुद्धरत्तमेनमग्नेविदहोमानिश्रोवश्तिषूश्षात्वेतश्चावयंतुप्रविश्यनित्वंतस्त्रउ
पसर्पमातरंभूमिमेतानित्वंतस्त्रःसोमएकेभ्यःअनुमंत्रयेतेत्यर्थः॥सए०यते॥अ
ग्नेसेयं॥सावविडुषाकर्मकर्त्तुमिनितिज्ञापयितुंन्यायविदभ्रंज्ञात्वावानुष्ठानमि
त्याऽऽ॥उन्०यते॥जानुमात्रेगर्त्तेएतावत्कालमातिवाहिकंशरीरमास्थायाहिता॥
न्निःसंस्कारंप्रतीक्षतेततोस्मिन्कालेदग्धःसन्नवयन्निक्रम्यधूमेनसहस्वर्गमि १०२
तीतिश्रुयतेऽग्नेऽ॥अथऽग्नऽस्वंकर्त्तारंजिघ्रंतःसर्वेसमाहरंतोन्त्वा

गच्छेयुःषष्ठतोनाक्षमाणाः॥यत्रोन्नात्॥ततोयत्रोदकमवक्लिद्यंनवतितत्प्रतिगच्छंति
तत्रापसकृन्निमज्जंतिसकृदवगाहंतइत्यर्थःततएकांजलिमुत्सृजंतिसमानोदकाःस
र्वेएकैकमंजलिमुत्सृजेयुरित्यर्थःपुरुषाःस्त्रियश्चतस्यगोत्रंनामगृह्णीयुरेतस्यगोत्रंना
मगृह्णीमोगार्ग्यपगोत्रदेवदत्तएतत्तउदकमित्येवमुत्कासिंवंतिदक्षिणामुखाःअथ
म्मादक्षिणामुखाऽतिस्मृतेःनिनयनदेशास्मृतितोवगंतव्यःततउदकाऽऽर्द्रीर्यान्या
निवासांसिपरिदधुःततःसकृदार्द्रीलिपीऽयंतिआम्नासोनकार्यःततःउदगयाणि
वासांसिविसृजंतिशोषणार्थंततस्तत्रैवासतेआनक्षत्रदर्शनात्ततोनक्षत्रेषुदृश्यमा
नेषुगृहंऽविशेयुःसर्वेमासाःआदित्यस्यवादृश्यमानेकस्मिंश्चिन्मंडलेरश्मिवर्जिते
प्रविशेरन्ऽअस्मिन्पक्षेआमंडलदर्शनादासते॥कनि०घ्मा॥प्रविशेयुःउन्नयवचन

मानुपूर्व्यसिध्यर्थं॥आप्यंशांति॥गृहंआप्यात्रमादीनुपस्पृशंतितताःप्रविशेरन्॥नैत०
रन्॥एतस्यांरात्रामन्नंनपचेरन्नभात्याः॥क्रीते॥रन्॥क्रीतेनवोत्पन्नेनवावर्तेरन्
केचिदेतत्सूत्रंनपठंति॥त्रिरा०नस्युः॥सर्वेभात्याः॥ह्रादरन्॥मातापितरौयज्ञो
पनीयकृत्स्नंवेदमध्यापयतिएतेमहागुरवःएतेषुह्रादरात्रंमादानाध्ययनेवर्ज मृतेषु
येरन्दशाहंवेतिवस्यमालेनसहविकल्पःनात्रशौचंविधीयतेअपितुदानाध्यय
नवर्जनमात्रंआशौचंतुस्मृत्युक्तंद्रष्टव्यंदशाहंवात्रशौचमित्यादि॥दशा०डेषु॥
मृतेषुदानाध्ययनेवर्जयेरन्निति॥सर्वत्रसंबध्यते॥गुरौ०पिंडे॥उपनीयकृत्स्नवेदा
ध्यापकेगुरावसपिंडेपिदशाहंह्रादशाहंवेतिपूर्वेसहविकल्पःमातापित्रोस्तुसपि ण १०४
उत्वादशाहंह्रादशाहंवाविकल्पः॥अप०स्त्रीषु॥दशाहमेव॥त्रिरा०र्येषु॥एकरे

अपातेच॥

शाध्यापकेष्वित्यर्थः॥ज्ञातौ०पिंडे॥त्रिरात्रमेवसमानोदकइत्यर्थः सपिंडतातुपुरुषे
सप्तमेविनिवर्तते॥समानोदकभावस्तुजन्मनाम्नोरवेदने॥प्रेता०स्त्रीषु॥त्रिरात्रमेवअदंतजाते
त्रिरात्रमेव॥अपरिजातेनामासंश्रयोगमस्तित्रैवत्रिरात्रमेव॥एका०रिणि॥सहाध्यायीस
ब्रह्मचारीतस्मिन्मृतेएकाहंवर्जयेत्॥समा०त्रिये॥समानग्रामवासिन्यश्चस्त्रि
योमृतेएकाहं
वर्जयेत्अनाशौचनिमित्तेषुगुर्वादिषुश्रोत्रियपर्यंतेषुमृतेष्वध्ययनमात्रंवर्जयि
त्वेनदानमित्युपदेशःअत्रान्येव्याचक्षुःत्रिरात्रमक्षारलवणाशिनःस्युःमहागु
रुषुतुह्रादशरात्रंवाऽक्षारलवणाशिनःस्युःविकल्पःदानाध्ययनेवर्जयेरन्दशा
हंसपिंडेष्वित्यनेनप्रकरणेनाशौचंविधीयतेआशौचादिकंचेयंतेनस्मृतेराशौच

विस्तारोविज्ञेयइति॥४॥धर्मशास्त्रेषुदारुश्चविहितावोदकुम्भिका।येषांतेषांतुसर्वे
षांदारुकर्मेतिसाधितं॥तत्रत्वनाहिताग्न्यादेर्विशेषावक्ष्यतेधुना।विशुल्कंबर्हिराज्यं
चेत्येवमंतंसमंभवेत्॥नास्यानुस्तरणीकार्यापात्राणांयोजनंतथा॥घृषदाज्यंतथास्वा
थौदितिर्दृश्यविदोमतं॥नानाहिताग्नेःपात्रैर्योविद्यतेऽग्निर्बौधायनःतादृङ्नातुनयेद चप्रा
ग्निंप्रेतंत्वापितृपरं॥अयुजोग्निर्युनाहृद्याःपीठचक्रेणवानयेत्॥प्रेतस्यदक्षतोना
स्याईयुःश्रुवविदेवच॥नग्निनागंततःप्राथकर्तव्योक्षतिश्रुवत्॥दर्शेष्टेनाहिताग्नि
स्तुरहेत्यत्रोक्तश्रुवत्॥कपालाग्निर्दहेदग्न्युपनीतंतथानरं॥प्राकृतंपनयनात्प्रेतं १०५
लौकिकाग्निर्दहेन्नरं॥अग्निर्वलंकपालंतुतस्यातत्रविनिक्षिपेत्॥करीषादिततो
योग्निर्जीतःसतुकपालजः॥उद्धृतान्नेविधेयोग्निर्दर्शेतत्तरपञ्चिमे॥तथाशास्त्रा

तरेदृष्टोघलीताःप्रणयेत्ततः॥स्रुवातेहिरण्यशकलेतिलाज्यंविनिक्षिपेत्॥तंतंत्रेने
तिहुरेवोक्तमिध्मचित्तादिश्रुवत्॥पत्न्युछापनपर्यंतंधनुरंतमथापिवा॥ततोहिरण्य
शकलैःछिद्राण्यपिदधातिवै॥घृतसिक्तंतिलाज्यंविक्षिरेत्तेतकलेवरे॥अथेमम
त्रेचमसंश्रुवंपात्रानुमंत्रणं॥सम्मृजानुनिपात्याथचतस्रोजुहोतिवै॥तथाभ्रृतभृ
ज्जुह्यात्पंचमीहृदयेततः॥सिञ्चातादितताःकुर्यात्तीर्थप्राप्तसंविधिं॥ततःप्रज्वल
येदग्निंप्रेषानात्रनवेदिति॥तंदग्धानमित्यादिसर्वंश्रुवविदेवतु॥अस्थिसंचयना
देस्तुसर्वंसाम्यान्नकथ्यते॥संव०क्षत्रे॥संचीयंतेस्थीनियेनकर्मणातत्संचयनंक्रु
म्लपक्षस्पदशाम्याऊर्ध्वंनयुजासुतिथिषुएकादशीत्रयोदशीपंचदशीत्यासुएक
नक्षत्रेयेननाम्नाएकमेवनक्षत्रमभिधीयतेतन्नामकेनक्षत्रेऽस्यर्थःआषाढद्वयं

फाल्गुनीहृयंत्रेणपदाहृयमितिषड्भ्योन्यत्रनक्षत्रेकर्त्तव्यमित्यर्थः अंतर्दशाहेअतीते
वादशाहेकृत्वपक्षागमनमात्रइदंकार्यंनातीतएवदशाहइतिनियमः अतीतेदशा
हइत्ययंपक्षःसंवत्सरेसपिंडीकरणपक्षएवोपपद्यतेद्वादशाहेसपिंडीकरणपक्षेतुनो
पपद्यतेसपिंडीकृतस्यप्रेतस्यपृथक्पिंडेनियोजनस्यप्रतिषेधात्॥यःसपिंडीकृ
तंप्रेतंपृथक्पिंडेनियोजयेत्।विधिघ्नस्तेनभवतिपितृत्वंचोपजायतइतिशातात
पःसंचिंत्यचैकोद्दिष्टंविधीयतेप्राहुरस्मेदद्युरितितस्मात्तस्मिन्पक्षेद्वितीयेहनि
चतुर्थेहनीत्यादिकालोद्रष्टव्यः॥अत्रान्यसः॥अमंगलेकुंभेपुमांसंसंचिनुयुःस्त अभ्रूषिते
नरहितःकुंभःअंजलेर्लोपायांकुंभ्यास्त्रियंसंचिनुयुःस्तनवतीकुंभीअयुजइत्यादि १०६
अभ्रूषितायां
श्रवत्॥क्षीरेत्तीति।क्षीरमिश्रोदकेनकलशोक्षतिमंत्राहुतिरुक्तौषधारवा

तं॥अंगुष्ठांतरं॥कलशोक्षितेसंचेतारोंगुष्ठोपकनिष्ठिकाभ्यामेकैकमस्तिगृहीत्वा
असंह्रादयंतःशनैर्यथानस्यात्तथाकुंभेवदध्युःपादौपूर्वंनवदध्युःशिरउत्तरंनव
दध्युःउत्तरवदनमनुपूर्वंसिध्यर्थंसुसंमितिशिरःपर्यंतंकुंभेवधाय ततोन।
स्मश्रूवेणि संशोध्यसूक्ष्माण्यस्थीनिशिरसउपरिसंचित्यततोन्नेतआकाशमित्यादि
जक्षणयुक्तेदेशेगर्तंखात्वायत्रगर्तेसर्वतोपिदिग्भ्योधस्तिर्यक्चापोननिष्पदेर
न्वर्षाभ्योस्तस्मिन्नार्तेकुंभमवदध्युःउपेत्यचामंत्रंकर्तॄन्यात्उत्तरांश्चमंत्रा
न्कर्तैवब्रूयात्॥उत्तरेत॥उच्छुंचस्वेत्यतयापांसूनप्रक्षिपेद्वटेयथाकुंभआन
नपर्यंतंनिमग्नोभवति॥अवशेषं॥अवकीर्णेतेकुंभानानपर्यंतेततउच्छुंचमाने
त्येतांजपेत्अवकीर्यवचनंपांसुप्रक्षेपोनधर्मत्वात्कार्योपितुकुंभानानपर्यंतंगर्त्त

पूरणायालंकर्तव्यइत्येवमर्थंउत्त०दद्युः॥ततउत्तरेत्यस्वाघरादिकपालेनकुंभमपिधा
यततोगन्तेस्यार्थआप्तंपूरणंकरोतियथाकुंभोनदृश्येतकर्मतिरास्तिवज्ञापनार्थादथ
राष्ट्रादयमर्थोलिङ्गः ततोनवेक्षंष्टष्टतोनीक्षमाणाःप्रत्याव्रजंतितोपउपस्पृश्यस्नात्वेस त
र्थः ततोस्मिन्नहनिभ्राड्नमस्मेप्रेतायकेवलायदद्युरेकोद्दिष्टविधानेन॥५॥गुरु०रन्न॥
गुरुलाअग्निमंतागुरुयेषांमतः अन्यतोवाप्युत्रपश्वहिरण्यादिरपक्षीयमाणाः संतो
मावास्यायांश्राद्धातिकर्मनामकुर्युः तत्रमंत्रवंतीक्रियांज्येष्ठः करोतिइतरेत्पासते॥छुरो०
त्तेनि॥आगादित्योदयादग्निंसहनस्मानमायतनेनसहदक्षिणस्यांदिशिहरेयुः दक्षि
णादिशंप्रतिनयेयुरित्यर्थः ऋत्वादग्निंसर्वत्रैनंपवनाग्नेरेवायमुत्सर्गः गृह्यस्येत्यनुप १०७
गम्यमानेतिप्रसंगः त्रेताग्नेरामपिप्रसज्येतअथतेषांयावज्जीवंधार्यत्वाउत्सर्गोनोप

पद्यतेतदत्रापिसमानंऔपासनोपियावज्जीवंधार्यतएवपालियहणादि गृह्यं
पस्त्वरेदितिवचनात्तस्मात्वचनस्येतिसिद्धंआयतनराष्ट्रेनाधिभ्रपणार्थानेस्वलादे
यज्यंतेतंत्र०घ्राणाः॥अथतमग्निंचतुष्पथेप्रक्षिप्ययत्रवाअदक्षिणस्यांवाअचतु
ष्पथेवान्युप्यअथतमग्निमप्रदक्षिणंत्रिःपरियंतिसव्येःपालिभिःसव्यान्नूनाघ्रा
नाःताउयमानाः॥अथा०लानि॥अथानवेक्षंष्टष्टतोनीक्षमाणाःप्रत्याव्रजंतिअ
थराष्ट्रऊर्वहननस्यप्रत्याव्रजनंगत्वाश्रांकानिवृत्यर्थः ततःस्नातिसर्वेततःसर्वेके
शादीन्निवापयंतिपुनरपिस्नातिआप्तंस्नानंकुर्युः ततोवस्त्रमालान्युपकल्पयीरन्
राष्ट्रजोपःछांदसःउपकल्पनविधानात्पुराणानामुत्सर्गः अनुक्तोपयोगानांयथा
र्थमुपयोगःकार्यःमणिकोनामजलधारणार्थोनाउविशेषः कुंभाउक्ताःआवम

नीयानामआवपनसाधनाःउदंचनकमंडलुप्रभृतयःश्रामीसुमनोमालिनःश्रामी
ष्यमालिनःमलिकादीस्त्रीन्नवानुपकल्पयेयुःश्रामीसुमनोमालिनइतिमलिकादि
विशेषणमित्यैककरणविशेषणमित्यन्येश्रामीमयमिध्मनुपकल्पयेयुःआकृतस्या
यंविकारःश्रामीमय्यावरलीवोपकल्पयेतअरलीइत्येतावत्सुव्यमानेएकेन वाक्येन
इध्मवेदनागुणवेदनंचविधातुंनशक्यतेइतिकृत्वाश्रामीमययज्ञलंकृतंपरिधीन्नोपकल्पये
रन्किमर्थमिदमितिनविद्मःइध्मवेदनातावन्नकार्यादध्मावहिषोब्रह्मसन्नहन
मितिस्तालीपाकेइध्मसन्नहनस्यदर्शपूर्णमासातिदेशोस्तिइतरेषांचस्तालीपा
कातिदेशोस्तिपाकयज्ञानामेतन्नत्रमितिदर्शपूर्णमासयोब्रपरिधयोविहिताः ए १०८

कविंशतिमिध्मदारूणिभवंतीतिमंत्रलिंगाच्चएकविंशतिधासंनश्रामीतिअथप
रिधीन्परिदधातिरक्षसामपहत्याइत्यर्थवादाच्चतस्मादतिदेशादेवसिध्येयुःश्रामी
मयत्वसिध्यर्थमितित्वेतदपिनइध्मस्तावच्छ्रामीमयोत्रविहितःदर्शपूर्णमासयो
ब्रेध्मपरिधीनामेकइत्येतद्दृष्टपालाशःखादिरोवेध्मइतिबौधायनःतत्रवेध्म
यज्ञलोनैकविंशतेर्यज्ञलंएकविंशतिमिध्मदारूणीतिविधिवाक्येब्रवणात्तद्दृष्टा
तरानुक्तेब्रतत्रवेध्मयज्ञलेनपरिधीनांयज्ञलेसतिपरिधयोपिश्रामीमयाएवभ
वंतिइध्मसंख्याब्रवण्यमतिदेष्टव्यैवइतरथासंभ्रहनमात्रातिदेशेनारलिमा
त्रत्वपालाशत्वादयोपिगुणानस्युरिष्मंत्वेवतर्हिसर्वसामभ्याधानंआहोनीतिश्रु
तानकार्यपिंचदर्शेध्मदारूण्यभ्यादधातीतिश्रुतेःइतरेषांचत्रेतावद्विनियोगःका

र्यः तत्रकेचित्परिहरंतिगुणचोदनैवेयंसावज्ञापनार्थंअन्यत्रेध्मपरिधीनांनानाह
क्षत्वंकार्यमितिरक्षोहननार्थंवावश्यंपरिधातव्याएवेतिचत्राहश्रुतीनामयत्वस
मुच्चयार्थःउपकल्पनसमुच्चयार्थत्वेसतिसर्वत्रचत्राहंकुर्यात्एवंतेपरिहृतवंतः
तदयुक्तामित्यन्येअस्मच्छास्त्रेऽध्मग्रहणेनपंचदशादारुकस्यग्रहणंदृष्टप्राचीना
वीतीध्मनुपसमाधायऽध्मसन्निधायेतिचएकविंशतिवादिनाप्युभयत्रपंचदशा
त्मभ्युपगम्यतएवतत्रस्वशास्त्रदृशेनसामान्यादिध्मावहिर्बोध्यसन्नहनमित्यत्रापि
पंचदशादारुकस्यैवग्रहणंपंचदशादारुकस्यसतःसन्नहनाद्यतिदेशेनप्राप्तेय
थाशास्त्रेषवहोत्रकाणामनिहिंकारऽस्यत्रशास्त्रांतरेहोत्रकशब्दस्यसप्तसुत्रिषुवा १०९
दृष्टत्वेप्यस्मच्छास्त्रेमुख्यावज्ञितेषुदृष्टइतिकृत्वाहदशापिगृह्यंतेस्वशास्त्रदर्शनि

सामान्यात्पंचदशादारुकस्यग्रहणंएवंकृत्वाग्रहणतौपावलेपरिधयोनैवसंनह्यंतितः
दतिदेशादितरेषुपिपाकयज्ञेषुनैवसंनह्यंतिग्रहणतौपरिध्यादीनामाधार्यणविनियो
गानुरूप्यंपंचदशादारुकस्यैवग्रहणं॰अथोच्यते॰एकविंशतिधासंनह्यामीतिसंन
हनमंत्रेसंख्याश्रूयतेमंत्रश्चातिदेशात्पाकयज्ञेषिभवतिपंचदशकाष्ठत्वेलिंगानु
पपत्तिःनचोहःकर्तुंशक्यतेनग्रहतावूहोविद्यतइतिन्यायादितिदयुक्तंनह्यस्यमंत्र
स्यलक्षणापाकःप्रकृतिःकिंतर्हिदर्शपूर्णमासौतस्मादत्रास्योहएवकार्यःअन्येतुमंत्रं
नैवेच्छंतिअपिचेध्मपरिधीनांनानाहक्षत्वमपिदर्शपूर्णमासयोर्नभवतापसंबंधो
रूंयत्तूक्तंरक्षोहननार्थंपरिधातव्याइतितदप्ययुक्तंपूर्णपात्रेणैवरक्षोहननस्यकृ
तत्वात्नचात्रग्रहणयनस्यकृविःप्रयोजनत्वमुपपद्यतेआज्यहोमत्वेपिदहनकर्म

णिप्रणयनदर्शनात्अपः प्रणयतिआपोवैरक्षोघ्नीःरक्षसामवहत्याइतिश्रुतेरक्षो
हननार्थत्वंयत्कार्यार्थंयदुपादीयतेतच्चेत्कार्यान्तरेनकृतंकिमितिउपादीयेतरक्षोहन
नंचपरिधिकार्यंपूर्णपात्रेणैवकृतमितिनपरिधयउपादेयाःअतःसर्वत्रपंचदशादारु
कएवेध्मइतिसिद्धेअनेनैवान्याधेयेपिपार्वणेपरिध्यादीनांविनियोगमनु
क्रुवन्बर्हिषांसमन्वारब्धेसर्वत्रैवमेवपारंपर्येपिदेवाग्नेवमेवअनेनतुवचनेन
परिधयोहवीःसगुणाविधीयंतेतेनात्रापूर्वसन्निधौअनूयाजसमिच्च
नकार्याविध्यभावात्तन्नवतिदेवाग्नेतूर्णपात्रेणैवात्ररक्षोहननस्यकृतत्वात्परि
धिविधानंनोपपद्यतइत्यारंकानकार्यान्तरेपरिधिविधानस्यतेनैवकार्येणान्याग्नि १११०
सत्रेकिंचनत्रप्राणमस्तिविधिनेदात्तस्यकार्यस्येहान्येनकृतत्वाच्चकार्यंतिरंकल्प्यं नीय

न्नित्यलमतिविस्तरेणआनडुहंगोमयंचर्मवोपकल्पयेयुःनवनीतंचअज्यमानंचयाव
त्योसुवतयःस्वगृहेतावंतिकुशपिंजूलान्वोपकल्पयेयुः॥अग्निर्न्वेन्नि॥अथाग्निहो
त्रविहरणकालेअपराह्णेशम्योमय्योःशमरणीर्यामग्निंमंथयेत्अधर्वेनिअथंवाग्निः
पवनोभवति॥तंदी०मानाः॥तंप्रहरणंमंत्रस्योत्तरंगत्वात्रोकानिहत्यर्थआयुष्मताकु
लेहव्यानामन्येषांचकथाःकीर्तयंतइतिहासादानिमंगल्यानिब्रुवंतःमथितमग्निंदी
पयमानाःगृहाद्गृहिरेवासतेआरंगातरात्रान्निशियस्मिन्कालेत्वग्नीमासतेजनास्तछा
तरात्रेःउप०रस्मात्॥ततोयदानश्नाःक्वचिद्ब्रह्मरंतिदाउत्तरविवक्षार्थमनुवादोयं
संप्रविष्टेषुवामात्येषुगृहंनिवेशनंवाकिमुक्तंभवतिरात्रात्यागंपियद्यमात्यागृ
हंनिवेशनंवाप्रवेष्टुकामयंतेतदावातेषुप्रविष्टेषुएवंरात्रात्रेणसहविकल्पः नि

वेत्रानग्रे नात्रसंवेत्रानमुच्यतेन्यग्रोधस्थानमित्यर्थः उपसर्गव्यत्ययोऽद्रष्टव्यः उक्तंचनै
रुक्तैः निरित्येषसमित्यस्यस्थानइतितद्वदत्रापिअनयोरन्यतरेकालेकतोदक्षिणात्
द्वारपक्षादारभ्यआउत्तरस्माद्वारपक्षात्संततामुदकधारांसिंचेत्तंतुमित्स्वा॥अ
थाऽग्निः अथरात्रौअस्मिन्काले अंतरमौपासनमुपसमादध्यादितिज्ञापनार्थंततः प
श्चादस्यानडुहंचर्मलोमभिर्युक्तंत्यादिव्याख्यातंततश्चर्मण्यमात्यानंरोहतेस्वाकर्त्रेवजंगि रोहयेदा
त्याःसर्वेभिमांसःस्त्रियश्चामात्याइत्युच्यंते॥इध्मंध्यात्॥आज्यसंस्कारांतंकृत्वाऽग्नं
मित्स्वाग्नेःपश्चात्परिधिंपरिदध्यात्ततोदक्षिणतस्तल्लीततउत्तरतस्तल्लीमेवपरि
धिमित्येकवचनादाद्यस्यैवसमंत्रकत्वमितरौतल्लौ॥अंतरेत्ना॥अथअंतर्न्यग्निमि १११
तिपादेनअग्नानमुत्तरतोग्निनिदधातिऋचंपादमग्रहणइत्यत्रपादग्रहोमूलवत्वी

यथापादपूरितेनात्रपादमात्रस्यग्रहणंनऋचःततआज्यभागांतंकृत्वापरंमसो
इतिवत्तस्मिन्नित्स्वेत्यारभ्यांतंतथाजुत्वायथेस्वामात्यानीक्षेत॥युवंजेषु॥अ
मात्येषुयाःयुवतयःस्त्रियस्तादृगंतरूपंकैनविनीतंगृहीत्वातेनांगुष्ठोपकनिष्ठिकाभ्यां
पार्ष्णिभ्यामक्षिणीअंजंतेऽथक्यालिभ्यामितिवचनंऽथस्थूरुभयपदेवा
जीरमनपयथिलेत्येवमर्थंतेनहित्वंकुरुपिंजलानांनास्त्येवततोनवेक्षमाणाः ऽ
थतोविसृजेयुःकुरुपिंजलानिरमाऽक्षेत॥इमाःस्त्रीःकर्त्रंजानायुवतीरी
क्षेताअरमन्नीत्॥ततएतयाऽग्नानंकर्त्रेदमग्निमरोत्रथमवचनात्पश्चादि
तरेग्निमरोयुक्तस्तल्लौ॥अथाऽग्नेत्र॥अग्निनावानडुहेनगोमयेनवाविछिन्नया
वोदकधारयापोहिष्ठेतित्रिभिनास्मिन्मानयाग्नेयोपासनाग्निंपरियंस्तुतसमि

न्कालेऽपराजितायांदिशिस्थित्वाकर्त्तरीमङ्गुष्ठंजपेत्॥यिंग०रंति॥एवंगुणयुक्तो
नड्वान्परिणेतव्यः॥अथस्विष्टकृदादिसमापयेत्उत्तरतोथश्राद्धात्॥अथोच्छाद्य॥
अथोपविशंतियत्राग्निरस्यमानानवंतियोदेशोग्नीष्टत्रअकृतेनवाससाच्छाद्यो
पविशंति॥आसन्यात्॥तत्रैवआउदयादस्वंतआसते॥उदि०क्षिणा॥ततउदि
तेआदित्येआदित्येसौर्यालिंगस्तस्यनामिवव्याख्यातानिजपित्वाअन्नंसंस्कृत्येति
वचनमाज्यभागांतंकृत्वाततएवान्नादयनःशोभवदग्नमितिहोमःकार्यइत्येवम
र्थंअस्यवाख्यातंतथाजित्वाअन्नस्यतुधानावत्संस्कारःततोहोमशेषंसमाप्यत
तएवान्नात्ब्राह्मणान्भोजयित्वास्वस्त्ययनंवाचयीतततोगोःकंसोहतंवासइति ११२
त्रीलिंगुक्तवद्भोदक्षिणोदद्यात्औदयादित्येवसिद्धेउदितआदित्यइतिवचनंअ

ध्यापनकालेपिसौर्यालिंदिवावैबाध्येतव्यानिनकानिचिद्ब्राह्मैरेवउक्तव्यानीत्येवम
र्थंतेनप्रत्यनड्वन्वरोहणेस्वंतमभ्युदियाद्धेदित्यत्रवाधरेयुरुदितेजपइतिसि
द्धं॥६॥अथाष्टवा॥अथश्राद्धोधिकारार्थःइतउत्तरंवक्ष्यमाणोविधिःश्राद्धेवेदि
तव्यइतिअतःश्राद्धोहेत्वर्थःयस्मात्श्राद्धान्निःश्रेयसप्राप्तिःमनुष्यैरपिचक्रियतेतत
स्माद्दर्शमश्रतिपार्वणमितिश्राद्धनामअन्वर्थसंज्ञावेयंपर्वणिभवं पार्वणमिति
तथाप्येकस्मिन्नेवपर्वणिभवतिअमावास्यायांनोनयोःपर्वणोःकुतःपिंडपितृयज्ञे
नसहव्यतिषंगदर्शनात्तस्मात्तेभ्यविप्रकृष्टंदर्शयेन्निमानितिमनुःअमावास्यायांपि
तृभ्यइतिगौतमःपित्र्यंतुदिवसंयद्वीयतेब्राह्मणेभ्यःश्रद्धयातच्छ्राद्धंकाम्यंश्राद्धंप
वमानंशुचिकामस्येत्यादिहविर्नित्यनिमित्तमाभ्युदयिकंएकैकमेवोद्दिश्ययच्छ्राद्धंश्रा

ऽग्नस्मैदद्युःएकादशाहेएकोद्दिष्टमित्यादितदेकोद्दिष्टंधर्म्मेदास्यतुपदेशःश्राद्धइसे
तावतैवसिद्धेपार्वणादिग्रहणंधर्म्मेदृश्यदर्शेनार्थंकर्त्तव्यताविध्यर्थंचधर्म्मेदृष्टफलेदृष्ट
दृश्यामः॥आला०सर्वेषा॥आलस्यरहितःक्षत्रियवैश्यादिर्नेहस्यर्थश्रुतेस्वाध्यायःशील
स्वभावःशमदमादियुक्तत्वंक्रोधरागादिवर्जितत्वंचहविष्यंहितकरणंनिषिद्धवर्जनंच
एतैस्त्रिभिर्गुणैःयुक्तानेकेनवागुणेनयुक्ता नुपवेश्येत्यनेनसंबंधःकालेत्रा।
पितान्स्मृत्युक्तनिमंत्रणकालेनिमंत्रितानित्यर्थःउक्तंचमनुनाप्रेवंयुर्वीश्राद्धकर्म परेद्यु
ण्युपस्थितेनिमंत्रयीतत्रवरान्सम्यग्विज्ञानयथोदितानितितेषांचैतधर्म्मभवंति
निमंत्रितोद्विजःपित्र्येनियतात्मानवेत्सदानचछंदांस्यधीयीतयस्यश्राद्धंनवेदिति ११२
मनुःस्नातानितिक्वचनंनियमेनस्नातान्भोजयेत्केनचित्कारणेनस्नानाशक्तौ।

मितिया

भोजयेदित्येवमर्थेअन्येस्नातानितिसमाहस्नानितिभाक्तवःअन्येस्नानङ्यैःस्नाता
नितित्वस्नानंस्वेनङ्यैणकारयितव्यंक्तवःप्रक्षाल्यपादौपाणीचेत्यावश्यकत्वेन
विहितंपशौचंतद्धपादस्थानित्यमितिज्ञापनार्थंकृतपशौचवचनंतेनशुद्धपादत्वे
प्यत्रनित्यमेनपशौचंकार्यमित्यर्थःअन्येतुस्वयमेवतेषांपादानप्रक्षालयेदित्येवम
र्थमितिभाक्तवःआचांतानितिकर्मांगभावंनविधीयतेतेनभोजनांगंश्राद्धांगंवहि म
रत्वमेयुःएवंगुणविशिष्टनुदङ्मुखान्सुतनुपवेशयेतउदङ्मुखवचनंप्राङ्मुखत्व
निहत्यर्थंपित्रवदितिक्वचनंनमनेतेपितरइत्येवंमनसाध्यायंनुपवेशयेदित्येवमर्थइ
त्येकेअन्येतुपितुर्हिंपितामहायवृद्धतरंयपितामहायवृद्धतममित्येवंयथावयउ
पवेशनार्थमितिएकैकस्यैकैकमुपवेशयेत्त्रा।द्वौद्वौवात्रीस्त्रीन्वा॥अतोपिश्राद्ध

णअधिकान्नवेयुःसर्वथाब्राह्मणस्यैकोफलाधिक्यमस्त्येवसर्वथात्यक्तर्मणो
मृताकर्मलुप्तंकृविदपिसमानफलतांशंकानकार्यामृताकर्मविध्यानर्थक्य
प्रसंगात्तत्रैवैकंसर्वेषांत्रयाणांभोजयेत्तद्दैवेपित्र्येत्रीन्नैकैकमुभय
त्रवाभोजयेत्तुसमस्तेपिनप्रसज्येतविस्तरेइतिमनुनोक्तस्यैकैकमुभयत्र
वेत्यस्यपक्षस्यायंप्रतिषेधःअस्यप्रतिषेधंकुर्वतामनुक्तमन्यदनुज्ञातंभवति
तेनैतत्सिद्धंभवतिदैवमपिभोजनमत्रकार्यंतस्यविधिःस्मृतितोवगंतव्यः
आचार्यैस्तुपित्र्यस्यैवविधिरुक्तस्तेअस्मद्योक्तिकर्तव्यतामात्रमेवका
र्यंनशास्त्रांतरंदृष्ट्वाविस्तरःकार्यःमनुरपिसक्रियादेशकालौचशौचब्राह्म ११४
णसंपदंचैतान्विस्तरोहंतितस्मान्नेहतिविस्तरमितिबक्तव्यंवास्वग्र

द्योक्तंयस्यकर्मणिकीर्तितंतस्यतावतिशास्त्रार्थेकृतेसर्वःकृतोभवेदितिगृह्य
विदः।येस्तेनपतितक्लीबायेचनास्तिकहतायइत्याद्यान्वर्ज्यश्रुतिकामनो
येजाद्यंसपिंडीकरणंत्रीनुद्दिश्यक्रियमाणंश्राद्धमध्येतदेवहिप्रथमंतद्वर्जि
तेषुसर्वेषुश्राद्धेषुकामंत्रयाणामेकंभोजयेतसपिंडीकरणेतुनियमेनत्रयाणां
त्रिभिर्भाव्यंकामभिति।वचनमापत्कल्पोयमितिज्ञापनार्थंअन्येत्वनाद्येपार्वणश्रा
द्धमावश्युःतच्चदत्रप्रथमंनिर्दिष्टंअन्येत्वनाद्येअभोजनेआमहिरण्यश्राद्ध
दावितिआमेवमूलफलेवाप्रदानमात्रंहिरण्येनवाप्रदानमात्रमितिबोधाय
नःअन्येत्वनाद्येउन्निक्षइतिअन्येत्वनाद्येआद्यानावेअन्त्यानावेसपदमावर
तिपिंडैर्व्याख्यातंजीवन्मतानांपिंडनिपरणमधिकृत्ययेपक्षापिंडपित्र्ययज्ञे

उक्तास्तेप्राङ्मेपिविज्ञेयाः॥अपःप्रदायउपवेशनादनंतरंआसनपालिंप्रोद
दातिआग्नेयीमुखःप्राचीनावीतीपितृकर्मकुर्वन्नित्यदर्शनान्हिगुणमुनानासनंप्र
दायततोदर्शनान्हिगुणमुनानासनेषुददातिआसनंप्रदायेतिसप्तम्यर्थेद्वितीं
याउपवेशनस्यप्राक्चोदितत्वात्॥अपःप्रदायततःपुनरपोददातितेजोमइ
ति॥ततस्तेजसमेकंपात्रंअश्ममयमेकंमृन्मयमेकंएतेषु त्रि
ष्वासंभवेएकइत्येषुदात्रिषुपात्रेषुत्रीण्यपितेजसानिवात्रीण्यश्ममया
निवात्रीण्यपिमृन्मयानिवातान्याग्नेयादिक्संस्थानिनिधायतेषुदर्शनंतद्वि
यततस्तेष्वपोनिक्षिपततःशंनोदेवीरितिचापात्रत्रयस्थाआपोनुमंत्रयेतस्मि
न्देवश्राद्धस्त्वान्नाहुतिःततस्त्रिषुपात्रेषुतिलान्नापवतितिलोसीतिमंत्रेण॥

प्रतिपात्रंमंत्रान्नाहुतिःपितृश्राद्धस्योहोनास्तीत्युक्तंश्राद्धतत्पात्रेषुगंधमाल्याद्यावपे
त्॥अप्रसव्येनपित्र्यंकर्मसर्वंप्रसव्येनाप्रदक्षिणेनकार्यमप्रदक्षिणंकार्यमित्यर्थःतती
यातुप्रकृत्यादित्वाद्दृष्टव्यासमेनधावतीतिवत्प्रदक्षिणमुपचारइत्याभ्युदयिकेप
वाददर्शनाद्योगविभागोवगतः॥उत्तरंपवीयेतिविधानात्सर्वमिदंपित्र्यं
प्राचीनावीतिनाकार्यमित्युक्तंअधुनाउपवीतित्वादितिहेतुनिर्देशादत्तआरभ्यावी
गंधमाल्यादिप्रदानाद्यज्ञोपवीतिनाकार्यमितिगम्यविदःइतरस्यसव्यस्यपाणेरं
गुष्ठांतरेणाघ्र्यंदित्यत्रेतउपवीतित्वाद्धेतोःपित्र्येतावत्प्राचीनावीतिनाभाव्यमयं
ज्ञोपवीतीतस्मादित्यर्थः येनपाणिनाकर्मकरोतिदक्षिणेनवासव्येनवातस्मिन्नंसे
यज्ञोपवीतेस्थितेप्राचीनावीतीभवतिततोन्यस्मिन्नंसेस्थितेउपवीतीभवतिअत्रतूप

वीतित्वात्प्राचीनावीतित्वसिध्यर्थंसव्यस्यपाणिपित्र्यतीर्थेनदातव्यमित्यर्थःअथवास
व्यपाणेःशिष्टग्रहीतित्वाद्दक्षिणंपाणिंसव्येनपाणिनागृहीत्वादक्षिणेनवैपाणिनाउप
वीत्येवार्घ्यंप्रियच्छेत्पित्र्यादित्र्याणांत्रिभिर्मंत्रैर्यथाऋक्संप्रयच्छेत्अप्पूर्वंअर्घ्यंप्रदा
नात्पूर्वमप्सुअपोदद्यादित्यर्थः॥ताअ०इति।निवेदयेदितिशेषःताअर्घ्योअपः
प्रतिग्रहिष्यन्प्रतिग्रहात्पूर्वंसकृत्सकृदर्घ्याअपोनिवेदयेत्स्वधाअर्घ्यइतिमं
त्रेणपित्र्यर्थंयावंतोब्राह्मणास्तेभ्यःसर्वेभ्यःप्रथमंएकमेवपात्रंसकृन्निवेदयेत्तत्प्र
तिब्राह्मणंतथापितामहार्थानांद्वितीयंसकृदेवप्रपितामहार्थानां
तृतीयंसकृदेवेत्येवमर्थंसकृत्सकृदित्यत्रनिवेदनस्यसकृन्नियमः॥ ११६
मादन्यासामपांदानंअर्घ्यदानंचअर्घ्यमंत्राश्चप्रतिब्राह्मणमावर्त्तंतेनिवेदनान्पोद

कदानार्घ्यदानेनुपदार्थानुसमयःकांडानुसमयोवाद्रष्टव्यःगंधादिदानेचतथाएवमे
कैकस्यबजपक्षेएकैकपक्षेत्वेकैकंपात्रमेकैकस्यनिवेद्यान्याअपएकैकस्यदत्त्वा
अर्घ्याअपएकैकस्यदद्यात्सर्वेषामेकपक्षेत्रीण्यपिपात्राणितस्यैवनिवेद्यपुनःपु
नरन्याअपोदत्त्वातस्यैवत्रिभिर्मंत्रैस्त्रिरर्घ्यंप्रियच्छेत्॥प्रस०नक्षि॥ब्राह्मणैःप्रस्थि
तानीताअर्घ्याअपोनुमंत्रयेतयादित्याइत्येनमंत्रेणप्रस्थिताइत्यादिकंमणिरूप्र
त्ययःऋतकालत्वमात्रेआनर्थक्यंप्रसंगात्तेनप्रतिब्राह्मणंपृथगनुमंत्रणंअर्घ्य
दत्वा[illegible]निनीतास्तदानीमेवानुमंत्रयेतएवंसर्वेषामर्घ्यदानेसंस्रवानर्घ्यशेषान्
पात्रगतानेकीकरोतिउत्तरेद्वेपात्रेप्रथमपात्रेआसिंचतीत्यर्थःएवंगृह्यविदःतत
स्तान्निरेकीकृतान्निरग्निःहुत्रकामश्चेन्मुखमनक्षिनवेन्नानक्षि॥नोद्व०वीत॥

पित्र्यणामर्घ्यपात्रंपित्र्यणामर्घ्यश्रेषाआपोयस्मिन्पात्रेएकीकृत्यएवंभूतंप्रथमं
पात्रंतस्माद्देशान्नोद्धरेत्समवनयनदेशान्नापनयेदाश्राद्धसमाप्तेःकिमिति।
नोद्धरेत्यस्मात्तस्मिन्पात्रेपितरस्तृप्तीयपात्रेणपिहितास्तिष्ठंतीतिगृह्यन्तरस्तृप्ती
येनपात्रेणप्रथमपात्रस्यापिधानमिच्छंतिअन्येतुतत्रेतितृप्तीयार्थेसप्तमीतेनाय
मर्थःआहतास्तेनप्रथमेनपात्रेणपितरस्तिष्ठंतीतिएतदुक्तंभवतिअर्घ्यपात्रंप्र
थमंपात्रंन्यञ्चिंकुर्यात्तच्चनोद्धरेदासमाप्तेरितिव्याचक्ष्युःशौनकोब्रूयात्शौ
नकएवमब्रवीदृशौनकग्रहणंतस्यप्रज्ञार्थंनविकल्पार्थं।एतद्दानं।।आच्छादनं
वस्त्रंदद्यान्नीव्यावीतीभवेत्ततोगंधादीनिंदद्यादालभेन्योदद्यादितिएतस्मिन्का॰ ११७
लइतिवचनंएतस्मिन्कालेएतान्येवदद्यादितिश्चैवमर्थंतेनगोहिरण्यादीनांश्राद्धे।

तेजाकंस्वधावाचनात्प्रदानंकार्यमितिसिद्धंदत्वातुदक्षिणांश्राद्धंस्वधाकारमु
दाहरेदितिस्मृतेः।उद्ध॰तिवा।।अनाहिताग्नेःपिंडपित्र्ययज्ञस्यपार्वणस्यचअतिथं
भोजनवतिश्राद्धोपसमाधानंतंपिंडपित्र्ययज्ञंकृत्वाआसनंप्रक्षाल्यदद्यात्तंपार्वणं
कृत्वाततःपिंडपित्र्ययज्ञस्थालीपाकादन्नमुद्धृत्यघृताक्तंकृत्वापित्र्यार्थंब्राह्म
णाननुज्ञापयतिअग्नौकरिष्येइतिअग्नौकरवैइतिवाअग्नौकरवाणीतिवा।।प्रत्यु॰
क्तिति।।आसनंरक्षध्वंनुज्ञादेयाक्रियतामितिकुरुष्वेतिवाकुरुइतिवायथासंख्यं।।
अथा॰।।स्तान्।।ततोन्नंजुहोतिउक्तमात्रेणमेक्षणेनावदायावदानसंयदाजुहो
यात्सोमायपितृमतेस्वधानमोग्नयेकव्यवाहनायस्वधानमइतिन्नेक्षणमनुप्र
हृत्येतिअथश्राद्धेहोमादर्वाचीनंपिंडपित्र्ययज्ञांगपूर्वंकृतमितिज्ञापनार्थंतेनान

योऽग्नितिषंगोत्तङ्कः अग्नौवचनमुत्तरविवक्षार्थं॥ अभ्य०क्वा॥ अभ्यनुज्ञायामिति
यदि ब्राह्मणाः पालिषु होममभ्यनुजानंति अग्निकार्यकरत्वंयदि स्वेषामभ्युपगच्छं
तीत्यर्थः तथासति पालिषु जुहोति अनुज्ञावचनंत्रस्यभ्यनुज्ञावचनंचनैवस्तः क
थंतर्ह्यभ्यनुजानंतिवानवेति ज्ञातुंशक्यउच्यतेयत्रपिंडपित्रयज्ञकल्पस्याग्निरस्ति
तत्राग्निस्याग्निसद्भावात्पालिहोमंनाभ्यनुजानंतियत्रतुपिंडपित्रयज्ञकल्पस्याग्नि र्न
स्तितत्राग्निस्याभ्यनुजावात्पालिहोममभ्यनुजानंतिकथंपुनस्तत्राभ्यनुजावः गृह्या
लिवक्ष्यामइतिहिश्रुतिर्भवतिउक्तंतेपालिमुखाःपितरइतिश्रुत्याकथंदग्निर्निर्वि
र्तितःएवंचकृत्वाविधिवद्भोजनंतेषामभ्यनुज्ञाविज्ञेयानतुप्रतिवचनेनेतिसिद्धंते ११८
नाभ्यनुज्ञायामित्यस्यपिंडपित्रयज्ञकल्पस्याभ्यनुजावेनाभ्यनुजावस्त्ययमर्थः तो

भ्यामेवमंत्राभ्यांपालिषुजुहुयात्तयावंतोब्राह्मणाःपित्रादित्रयार्थमुपविष्टास्तेषां
सर्वेषांपालिषुजुहोतिवचनात्मंत्रावृत्तिर्हीतत्रार्थादेकैकांआज्ञप्तिंविगृह्यविगृह्यस
र्वेषांदक्षिणपालिषुजुहोतिप्रेक्षणानुग्रहरणमर्थमुक्तंअग्नेतुपालिनैवजुह्वतित
त्यक्षेसुतरांनुक्तंअग्नेतुप्रतिब्राह्मणंहहेब्राह्मणेतीत्यग्नेवमंत्राभ्यांजुह्वतिविग्रह
विधानावादारंभस्यार्थवत्त्वेतिएवंपालौहोमःअस्मिन्पक्षेपिंडनिपरणकालेब्रा
ह्मणानांसमीपेपिंडनिर्वपणंभवतिउच्छिष्टसन्निधौपिंडान्दद्याद्वापित्रयज्ञवदि
तिस्मृतेःपालिहोमस्यविषयमुत्तत्रविस्तरेणवक्ष्यामःअनाहिताग्नेःपा
र्वणेअग्नौकरणेवनपालिहोमःपालिहोमंश्रुतिर्दर्शयति॥अग्नि०ब्राह्मणा॥देवाना त्या
मग्निमुखत्वादग्नौहोमःपित्रर्थंपालिमुखत्वात्पाणौहोमोमुखएवेत्यर्थः॥यदि०

शति॥अथद्वियमत्रविधातुमिष्टमितिगम्यतेतत्रान्नोकृत्वान्नाजनेषुनोजनार्थम
न्यदन्नमत्तुदिशतिददातीत्येकोर्थःयदिपालिहोमःकृतःतदावंतेषन्यदन्नंददा
तीत्यपरःआवंतशब्देविप्रतिपन्नाःतत्रकेचिदाजःयदापालिषुहोमस्तदाजतंन
न्नंनाजनेषुनिधायानक्षयिंत्वैवनिष्क्रम्यावमेयुःआवंतेषन्यदन्नंददातिननु
यदिन्नक्षणंनकृतंतर्हिचमनविधिर्नघटतेअप्युक्तित्वानावादितिचेत्वयंष्टा
मःकृतेपिन्नक्षणेकिमित्यावमेयुःअप्युक्तित्वादपिकिमित्या
वमेयुःक्वनादितिचेत्तदप्याविश्लिष्टंअत्रापिहिपालिहोमनिमित्तमावमनंवो
द्यतेनचसर्वमावमनमप्युक्तित्वानिमित्तंकर्मांगनैमित्तिकयोरविद्यमानत्वात्तथा ११९
हिपिंडदानमुत्काहमनुःआचम्योदकपराहस्यत्रिराचम्यशनैरति॥नैमित्तिकं

सूत्रं

वेदमप्युक्तित्वान्नावात्तद्वदिदमपिनैमित्तिकंपूर्वाह्णनिषेधश्चदृश्यतेअ
न्नंपालितलेदत्तंपूर्वमिन्नंत्यङ्मुखःपितरस्तेनतृप्यंतिशेषान्नंनलुंपंतितै॥यच्च
पालितलेदत्तंयच्चान्यदुपकल्पितं॥एकीभावेननोक्तंपृथक्भावोनविद्यतइति
ननुसपिंडीकरणेदृश्यतेजातस्योपवित्रम्यःपालिषुददातीतितस्यैवायंनिषेधःदा
त्रिवोदितत्वात्तस्यश्रद्धंतुहोत्रिवोदितंतस्मान्नास्यनिषेधइतिचेत्तत्रऋमःदृश्य
श्राद्धेनविधितोयस्मालोनिहितंअन्नंतदुच्यतेएवमुदीच्याआजःनाप्यकारस्त्वे
तन्नेच्छंतिचमुन्नक्षणेआवंतेष्वितिन्नक्षितेष्वित्यर्थःपालिषुजातंचेत्तेषन्नेषुआ
श्रितेषन्यदन्नंददातिनतयोर्मिश्रीभावःकार्यःयथानोकरणपक्षेअप्यभावेः
तुविप्रस्यपालावेवोपपादयेत्योग्निःसद्विजोविप्रेमंत्रदर्शिनिरुच्यतेइति

हिमनुनाग्निसाम्यदर्शितंतत्रश्राद्धितेषावघ्रानेनकार्यंअग्निसाम्यदर्शनात्प्रयोगा
तरस्यचतद्विषयस्याविधानात्केचित्वंगुष्ठनिवेशनादिप्रयोगांतरंकुर्वंतितत्पक्षे
आवघ्रानंकार्यंनवेतिचिंत्यंअन्नंपालितलेदत्तमित्ययंनिषेधःसपिंडीकरणएवत
स्यदर्शनात्त्वोदितत्वात्अस्यनभवतिजुहोतित्वोदितत्वाततच्छ्रुत्वोदितस्यैक्वय
रणंयुक्तंतस्यैवप्रथमंसंप्रत्ययादितिअत्रयुक्तंज्ञात्वाकार्यं।।अन्न०मंत्रे।।जतरो
घमन्नंभोजनार्थेषुपात्रेषुनिहितेघन्नेषुददातिअग्निहोमेपालिहोमेचसमान
मिदं।।सृष्ट०मिति।।सृष्टंप्रत्तंदत्तंऋध्नुकंऋद्धिकरणंशीलंइतिशेषोहेत्वर्थःत
स्मात्प्रत्तमन्नंदेयमितिभोजनस्यपर्याप्तमात्रंनदेयंततोप्यधिकंदेयंयथो। १२०
च्छिष्येतत्यर्थःत्रुट्य०त्वे।।मधुवाताइतितिस्रोमधुमत्यइतिप्रसिद्धाःअन्याद्धिः

निष्टनेछान्नज्ञात्वाततोमधुमतीस्तिस्रोक्त्वानित्येकांचश्रावयेत्तत्रेषुश्रावयेदि
त्येववक्तव्येज्ञात्वैताःश्रावयेत्प्रवर्तुभोजनकालेअन्याःश्रावयेदित्येवमर्थंभे
जुनाप्युक्तंस्वाध्यायंश्रावयेत्यिग्नेधर्मशास्त्रालिंगेवहि।।आख्यातानीतिहासा
श्चपुराणानिखिलान्त्वेति।।संप०येत।।अथसंपन्नमित्यनेनवाक्येनज्ञात्वा
णान्नष्टछतित्वेसंपन्नमितिप्रत्यूचुःततोयद्यदन्नमुपलुक्तंतस्मात्तस्मादन्नाउ
द्धरतिपिंडार्थंततःस्थालीपाकेनसहैकीकरोतिअन्नंप्रकिरणार्थंवार्थादस्मि
न्नेवकालेसर्वस्माज्जुक्रोषाउद्धरतिततोलुक्रोद्धृतशेषंनिवेदयेद्ब्राह्मणेभ्यः
इदंशिष्टंकिमनेनकर्तव्यमितिस्थालीपाकेनसहेतिनात्रपूर्वःस्थालीपाकः
श्रोत्यतेसर्वश्राद्धेषुप्रसंगात्अग्निष्टंवैततेनानुवादएवायंतेनयत्रस्थाली

पाकोविहितःतत्रतेनशुक्रशेषेणचपिंडनिपरणंभवतियत्रतुस्थालीपाकविधिर्नास्तितत्रशुक्रशेषेणैवकेवलेननिपरणंभवतिआचार्येणाष्टौश्राद्धान्युक्तानि अन्वष्टक्यंपूर्वेद्युर्मासिश्राद्धंस्यथपार्वणं॥काम्यमभ्युदयेष्टम्याम्नेकोद्दिष्टम्॥ थाष्टमं॥तत्रपूर्वेद्युश्चतुर्भिस्थालीपाकाऽऽहृत्याग्नौकरणंअग्निसमीपेस्थालीपाकेनशुक्रशेषेणचपिंडनिपरणंपिंडपित्रयज्ञकल्पस्यतेषुविद्यमानत्वात्तत्रसाधितमेवश्राकउत्तरेशुचतुर्भिर्भोजनार्थंदत्ताऽऽहृत्यघृताक्तंकृत्वापाणिहोमःब्राह्मणसमीपेशुक्रशेषमात्रेणपिंडनिपरणंतेषुस्थालीपाकविधिनावात्पिंडपित्रयज्ञकल्पाश्रयत्वात्त्वत्रार्थाद्वेत्वाचतदभ्युक्षणंचसक्तदाछिन्नावस्तरणंचलेत्वाद्भिरुदकेनेत्यादिपत्नीप्राश्नांतंभवतिअग्निम्त्येत्यादितिनभवतिअन्यत्रातिपरणयनादिसर्वंनिभवति॥अग्नि०ध्यात॥शेषंनिवेदितंब्राह्मणेर्यद्यग्निमतस्वीकर्तुमिच्छेत्ततदातेभ्योदद्यात्अथयद्यनुमतमनुज्ञातमिष्टैःसहोपभुज्यतामितितदास्वीकृत्यज्ञातिभिर्बंधुवर्गैःसहोपभुंजीत॥मनुरपि॥ज्ञातिभ्यःसत्कृतंदत्वाबांधवानपिपूजयेदितितोनाचांतेषुपिंडान्निदध्यात्सर्वेष्विधिनाअनाचांतेष्वित्येवसिद्धेशुक्रवत्स्वितिकथनंशुक्रवत्त्वेवनिदध्यात्नपूर्वमित्येवमर्थमितिनाभोजनात्सर्वंविहितंनिपरणंनकार्यमितिअतोज्ञायतेअन्यस्यमनुक्तस्याविरुद्धस्यागस्येछातःक्रियेति॥आचा०ष्टेके॥आचांतेषुनिपरणमेकेइच्छंति॥प्रका०जेत्॥अनाचांतेषुपिंडदानपक्षेपिंडानदत्वाऽऽचमनोत्तरकालमुच्छिष्टानांसमीपेघृतंप्रकिरेत्आचांतेषुपिंडदानपक्षेपिंडा

नदत्त्वातत उच्छिष्टोनासनीपेक्षन्नंप्रकिरेत्॥मनुरपि।सार्ववर्णिकमन्नाद्यमानीया
ज्याद्यवाशिष्टा।समुत्सृजेद्भुक्तवतामग्रतोविकिरन्नुवीतिअधुनाप्रथमंपात्रेवि।
ह्लुयात्ततउपवीत्ययज्ञोपवीतीभूत्वेत्यर्थः।मनुरपिउच्छेषणेदक्षिणेपाणावुपवीत्यु
च्यतेबुधैः॥सर्वेप्राचीनमावीतीनिवीतीकंठसंजनइतितत्तोदक्षिणंदत्वातुस्वधो
च्यतामितिब्राह्मणान्विसर्जयेत्अतिसृजेत्अनुजानीयाच्छापयेदित्यर्थः।तेचओं
स्वधेतिप्रत्यूचुः॥अस्तु०तिवा॥अस्तुस्वधेतिवाविसृजेत्तथासतितेवास्तुस्वधेति
प्रत्यूचुःविसर्ज्यब्राह्मणांस्तांस्तुनियतोवाग्यतःशुचिः॥दक्षिणंदिशमाकांक्षन्
यावेतेमानवाःपितरः॥दातारोनोभिवर्द्धंतांवेदाःसंततिरेवचश्रद्धाचनोमाव्य
गमद्बहुदेयंचनोस्तितिउच्छेषणंतुतन्निष्टेद्यावद्द्विजाविसर्जिताःततोग्रहबलिंद

द्यादितिधर्म्यंवस्थितइतिमनुः॥अष्टौश्राद्धानीत्युक्तंतत्राष्टकंचपूर्वेद्युश्चत्रा
सिमासिचेतिश्राद्धत्रयंद्वितीयेध्यायेव्याख्यातंपार्वणंचानाहिताग्नेर्व्याख्यातमे
वाग्नाहिताग्निस्तुपिंडपितृयज्ञंसमाप्यततःपार्वणंकरोतिपितृयज्ञंतुनिर्वर्त्तयेतिमनुः
तत्रपाणिहोमः।ब्राह्मणसमीपेभुक्तशेषमात्रेणपिंडदानंचकाम्यंचपाणिहोमःभुक्त।
शेषमात्रेणपिंडदानंचास्यैवमासिश्राद्धस्यपार्वणस्यैवैककार्यत्वादन्यतरेणैवालमि
त्युक्तंतत्रमासिश्राद्धंकृतवांश्चेत्पर्वणिकेवलंपिंडपितृयज्ञःकार्यएवकाम्यश्राद्धं
तंचेत्तेनैवैवालंनपुनर्मासिश्राद्धपार्वणश्राद्धेकार्यंकाम्यश्रुतिस्मृतिषुविशेषमपेक्ष्य
चरितार्थानपुनरावृत्तियिनुंशक्नोतिअग्निहोत्रद्रव्यवत्॥आभ्युदयिकेतुयुग्माब्रा
ह्मणाअमूलादर्भाःप्राङ्मुखोयज्ञोपवीतीस्यात्प्रदक्षिणमुपचारोयवैस्तिलार्थैर्गं

धादिदानंद्विर्द्विरृजुदर्भानासनेघात्ययोसिसोमदेवत्यःप्रत्यवरुद्भिःप्रत्यङ्मुख्यानोदी
मुखान्पितॄन्निमन्त्रयेकाम्यैएभ्यःस्वाहेतियवावपनंनोदीमुखाःपितरःप्रीयंता
मित्यर्घ्यनिवेदनंयथालिंगंनोदीमुखाःपितरःइदंवोअर्घ्यमित्यर्घ्यप्रदानमंत्रोयथा
लिंगपाणौहोमःअग्नयेकव्यवाहनायस्वाहासोमायपितृमतेस्वाहेतिहोममंत्रौम
धुवाताऽइतित्रचस्यस्थानेउपास्मैगायतेतिपंचमधुमतीःप्रावयेत्अक्षन्नमीमदंत
इतिचषष्ठीआवींतेषुनुक्काराद्यानुगोमयेनोपलिप्यतेषुप्राचीनायुनेदर्भानास्तीर्य
तेषुषडाज्याभिघ्नेणनुक्करोषेणैकैकस्यद्वौद्वौपिंडौदद्यान्नैवमंत्रेणमंत्राहन्निरु
क्ताअन्येतुनोदीमुखेभ्यःपितृभ्यःस्वाहेत्येवंयथालिंगंपिंडान्निष्टपंतिसर्पिषिदध्या १२२
नयतिएतदेवंषडाज्यंअनुमंत्रणादिपूर्ववत्अन्येत्वनुमंत्रणादिनेच्छंतिओंस्वधो

मतामित्यस्यस्थानेउपसंपन्नमितिरोषंपूर्ववत्अष्टमीश्राद्धंकाम्यवत्॥एकोद्दिष्टेत्वे
कोविप्रएकमर्घ्यपात्रंतदेवंनधूपोनदीपोनस्वधाराद्धोनपितृराद्धोननमःराद्धःतिलो
सिमंत्रस्योहःतूष्णीवातिलावपनंअर्घ्यनिवेदनंतूष्णीमेवेदंतेतत्सौत्रंनानुज्ञाकरोतिनोत्त
नार्थदत्ताऽऊह्यपघतास्कंदत्वाअमुष्मैस्वाहेतिपालिहोमःअमुष्मैराद्धस्यस्थानेत्रेत
नामवाक्यंनाभिश्रावलंनुक्करोषमात्रैकंपिंडंनिष्टपेत्तत्तस्यगोत्रनामगृहीत्वा।
निनयनमंत्रस्योहःअनुमंत्रणादिसर्वंनमंत्रकंनवतिपत्नीश्राद्धंतुनास्तिअग्निरम्य
तामितिविसर्जनंएवंनवश्राद्धवर्जितेषेकोद्दिष्टेषुनवश्राद्धेषुत्वेकोद्दिष्टेषुसर्वंनमं
त्रकंनवतिनवश्राद्धमंत्रकृन्नितिक्वनातदशाहेषुयानिश्राद्धानितानिनवश्राद्धा
निनवश्राद्धंदशाहानीतिक्वनात्यत्रयत्रास्मान्निःपालिहोमउक्तस्तत्रसर्वत्रभाष्य

कारः पिंडदानंनेच्छंतिस्थालीपाकेनसहशुल्कशेषेणपिंडदानंचोद्यतेतत्रस्थालीपाका
भावादितियेतुपिंडदानमिच्छंतितएवमाजःस्थालीपाकेनसहेतिस्थालीपाकेनसहपिं
डदानंकार्यनिष्ठथकस्थालीपाकेनशुल्कशेषेणेत्ययमर्थःनतुयत्रस्थालीपाकस्तत्रै
वपिंडदानंकार्यमितितेनतेषांपिंडेवलेनशुल्कशेषेणपिंडदानंकार्यमिति॥७॥अथ०
गवः॥उक्तोथःश्रलगवइतिकर्मनामसंवक्ष्यतेश्रलोस्यास्तीतिश्रलः अर्शआदिभ्यो
वाश्रलीत्यर्थःश्रलवतेरुद्यायथोगोपशुनायागःश्रलगवः॥शार०ईया॥शारदिव
संतेवाऋतौआर्द्रनिक्षत्रेणसकार्यः॥अश्वं०थस्य॥स्वस्यपशोरश्वंकायेनआ
लिंगेत्यनेनसंबंधः॥अकु०षत्॥स्वपशोरकुक्षिंषत्कार्यःकुक्षीवष्टषच्चनया १२४
यइत्यर्थःषत्वलोलोहितःशुक्लबिंदुभिःसंयुक्तः॥कल्मा०त्येके॥कल्माषंश्रलं

यादित्येकेआजःकल्माषोनामकश्चलविंदुचितः॥कामं०श्नेत्॥कामंकश्चलंश्रलीया
दालोहवांश्नेज्जवतिजंघासदृशइत्यर्थः॥ह्रीहि०क्ष्यि॥एवंगुणयुक्तंपशुमस्मात्कर्म
णःपूर्वमेवह्रीहियवमतीनिरङ्गिरन्निक्षिंवतिस्नपयतिस्वयमेवाशिर०सतः॥शिरस्त
उपरिष्टात्सन्यआनसतःआशुछत्रदेशात्॥रुद्रा०स्वेति॥रुद्रायेतिमंत्रेणततउत्सृष्टो
वर्द्धतेपशुर्यविष्ठस्सन्नदंतोभवतिसेचनसमर्थोवाभवति॥तंव०नंवा॥तंपशुमेव
मवस्तंवर्द्धयेत्ततोन्यतरस्यामवस्थायांकर्मकुर्योदृश्यमाणंयज्ञि०दिति॥यामा
द्बहिःग्राम्यादुदीच्यांवादिशिकार्यमित्यर्थः॥असं०मात्॥यत्रस्थंयामोनपश्यतियत्र
स्थोवायामेनपश्यतितत्रदेशेकार्यमित्यर्थः॥ऊर्ध्वं०त्रात्॥उद०त्येके॥अनयो
रन्यतरस्मिन्कालेकुर्यात्॥वैद्यं०ज्ञातिः॥श्रलगवंयोवेत्सोवैद्यः यःस्वयंकृत्त

वानसोचरित्रवान्यस्मिन्कर्मण्येवंगुणंब्राह्मणंमुपवेशयेत्राज्यभागांतंकृत्वा।
अथरात्रिमग्नेस्थायेतनंकरोतितत:सपर्णाभार्द्राखांशूर्पंयूपाधंखिरस्तादग्नेर्निख
नतितक्षणंनभवतिरात्रावग्निरितिवचनात्सावयूपयज्ञभागोत्राह्मणस्यैकुशरज्जु
वररात्रेर्भवत:व्रततीवल्लीपलाशविशेष:रात्रेरन्यतरयेतिविहस्यापाठ:कार्य:
प्रगृह्यतांततयोरन्यतरयारात्रियायूपंपरिवीयपरिवेष्यान्यतरयारात्रियाअर्द्ध
शिरसिभंगमध्येदक्षिणंभंगंयथाबद्धंभवतितथापशुंबध्नायूपेतत्परिवीता:
योवारात्रियोनिबध्नातिप्रत्यञ्चुरंवयस्मैनमइतिमंत्रेणयूपादयोविशेषाअ:
स्मिन्नेवपशौभवतिनपश्वंतरेकुत:पशुकल्पेविध्यभावात्।ओक्ष०क्ष्याम:।ओ। १२५
क्षणादिवचनंओक्षणस्याकृतनस्यपशुकल्पविहितस्यनिहत्यर्थंपशुनापशुक

ल्पेनसमानंविशेषमाह्रवक्ष्याम:।पात्रा०यते।पात्रीदारुमयीपलाशंपलंविपाहो
मकालेपात्रापलाशेनवावपांजुजयात्स्रुक्काअपवाद:स्रुत्याकर्षउत्सन्नस्रुतिमूले
त्वदग्निर्थंस्रुकंसर्वत्रस्मर्त्तव्यंत्रयाणामपिप्रदानानांहोममंत्रमाह।हरा।हेति।
द्वादशानामकोयंमंत्र:।षड्भिरृग्भि।उयायेत्यादिषंण्मेकोवामंत्रोनवेदित्यर्थ:।रुद्रा०
तिवा।अयमेकनामकोवानवेदित्यर्थ:।चत०ज्ञानं।वपास्थालीपाकावदानहोम
पर्यंतंकृत्वास्विष्टकृत:प्रागेकैकस्यादिग्लिंवतस्रभ्रतस्र:कुशास्तानिधायता।
सुवस्रुग्वेणमांसग्रहणंचबर्हिरेत्यास्तिस्रऊर्ध्वस्यादिग्रीतिप्रतिदिग्लावदे
शनंकार्यंयास्तिस्रऊदक्षिणस्यादिग्रियास्तिस्रऊध्रुतीम्यादिग्रियास्तिस्रऊदीच्या
दिग्रीतिदर्भस्तंबैस्तत्रैकंकटकवत्यधित्वासर्वेषामग्रंगृहीत्वाएकांस्रुत्यग्रधि

ताःकुञ्जास्तनाउच्यंतेचतु०नदतिचतुर्निर्यथाक्रमेणैवतत्तोदिशाउपतिष्ठेत
सूक्तयहलंकुङ्गायेत्यस्मिन्सूक्तेअस्मेसोमश्रियमधीत्यादीनामरौङ्गणेन
निहत्यर्थःसर्व०स्थानंएतच्चदिशामुपस्थानंसर्वसङ्ग्रामेषुभवतीत्यर्थःए
तमेवदेवंमध्येगोष्ठस्थयजेतेतिरौङ्गावेधुकंनिर्वपेदित्यादिषुचविज्ञेयं।।तुषा०
रेत्।।स्थालीथाकञ्जीहीलायेतुषाःफलीकरणेभ्रफलीकरणानामसूक्ष्म
कणास्तान्भ्रष्टुछादनिवाग्नावनुप्रहरेत्।।नोगावत्यः।।गावत्यस्त्वायश्चि
र्मणानोगमुपानदादिकुर्वीतेतिमन्त्रतोऽन०मिति।।अंगावदानकालेकेनचि
त्पात्रेणशोणितंगृह्णीयात्तत्तदिदानीमुत्तरतोनेदंनवीतास्त्विति१२६दभ्राजिषु
कुञ्जास्तनासुवाशोणितंनिनयेत्रवासिनीरितिमंत्रेण।।अथो०सर्पाः।।अ।

थतत्रस्थएवोदञ्चुखआहृत्ययत्रसंज्ञपनदेशेरुधिरंक्रबध्नंवाक्रबध्नगोहंवाअ
वस्तुतंन्नानिपतितंनवतितत्सर्पन्भ्यउद्धरतिध्वासिनीरितिमंत्रेणतच्चसर्पीहरंति
देवतारूपेणततःस्विष्टकृदादिहृदयश्लोघासनसहितंहोमशेषंसमापयेत्अथा
स्यरुद्रदेवस्ययज्ञस्तोत्रस्त्रियस्यवै।।सवत्सिनोभगवतोमाहात्म्यमधुनाब्रवीत।।स
र्व०यानि।।यावंतिकिललोकेनामधेयान्यभिधानानिसंतितानिसर्वाण्यस्यैवेना
मधेयानियावंतोलोकेक्त्वाद्याःसंतितैःसर्वैरयमेववाक्ष्यत्यर्थःत्रैलोक्येयावंतिःप
दार्थास्तेसर्वेरुद्रएवेत्यर्थःएवंब्रुवतारुद्रस्यसर्वगतत्वंदर्शितं।सर्वा।।सेनाः।।त्रैलो
क्येयावत्यःसेनाःसंतिताःसर्वाअस्यैवसेनाःनह्यन्यस्यात्यन्नाप्यस्यसेनाःसंनद्ध
तीतिअस्यतुनहान्नाग्याऽपपद्यतएवएवंब्रुवताराजादयोदेवादयश्चरुद्रस्युरुं

भवतिस्तुतिषुचनशुनरुक्तादोषः।सर्वा०णानि॥यावंतिचलोकेउच्चैर्यणानिउक्थ
शानिभृतानिविद्वत्तयाध्येत्ततयाध्यात्ततयादात्ततयातपस्तप्ततयाअन्ये
नवातानिसर्वाण्यस्यैवांशभृतानिभवन्त्यस्योत्कृष्टत्वसंभवःअथवासर्वाण्युच्चैर्यणा
निपर्वतादीनितान्यस्यैवतेषुचयंवसतीत्यर्थःएवमनेकधास्तुतवानाचार्यः।इत्ये०णा
नि॥इतिश्रीमद्वरदराजश्रीउक्थेनभागेनियोक्तृब्रह्मवंविदित्वायजतिऋत्विग्भगवेनयजमा
नःतमित्येवंविद्यजमानंश्रीणातिरुद्रदेवःअस्मुत्कृष्टेनसुखेनयजमानंसंसुनक्तीं
त्यर्थःअथवाएवंविक्तर्त्विर्युर्यजमानंश्रीणातियथोक्तेनफलेनसंसुनक्तीत्यर्थः।
नास्य०यते॥अस्यकर्मणःब्रुवाणंवक्तारंचविनेत्यपिशब्दार्थःतेनवक्तारमपिआप्नो १२७
यात्ज्ञातारमपिअध्येतारमपिउपकर्तारमपिनहिनस्तिरुद्रदेवइत्येवं[illegible]श्रूयते॥

नास्य०यात्।अस्यपशोर्जीवतश्चोषंनआप्नीयात्अन्यत्रइज्ञातःआप्नीयाद्वाअयंनि
षेधएकेषामतेनरुतःउत्तरत्रआत्मनविधानात्॥नास्य०न्तीति॥अस्यकर्मणःसंब
धीनिऋत्वाणियामंनाहरेयुःकेचिदपिकुतःअजाअग्निमनुक्रोहएषदेवोनवति
आहरणेसत्याहृतवतीःअजाहिनस्तिरुद्रदेवःइतिश्रुत्यैहेतौतस्मान्नाहरेयुरि
ति॥अमा०येत्॥पुत्रादीनसमीपतःअतिषेधयेतनात्रागंतव्यमिति।नियोनंइति
।जीवतश्चोषंपशोर्नियोगान्नियमेनआप्नीयात्स्वस्त्ययनइतिरुत्वाअतोज्ञायतेनि
षेधएकीयेपक्षइति॥अधुनास्यकर्मणःफलमाह।सए०शास्य।भृतगवेनेष्ट्व
तोधनलोकसुएयसुत्रपशवोयुर्यज्ञांसिभवंतीत्यर्थः।इष्ट्वाजेत्।एवंभृतगवेनें
ष्ट्वाअन्यंपशुंश्रेष्ठस्वस्ययूथस्येत्यादिलक्षणयुक्तमग्निषोमीयंजेत्सुनःभृत

गवकरणार्थो।।नानु०स्यात्।।सर्वथानुत्सृष्टोनैवस्यात्श्रलगवार्थंसकृदुत्सर्गेवि
श्रयकार्यःश्रलगवःसकृदवश्रयकार्यइत्यर्थःएवंचकृत्वानित्यकर्मेदमितिज्ञायते।।
नहा०यते।।नहापशुर्भवतिपशुगुलंकंकमपशुःश्रलगवनामकेनपशुकर्मणा
रहितोनभवेदित्यर्थःयतएवंश्रूयतेतस्मात्सकृदुत्सर्गेविश्रयकार्यःश्रोता०यात्।
श्रलगवंसमाप्ययामंत्रविश्रयतेतःश्रागुक्तंश्रोतातीयंजपन्गृह्यानियात्गच्छेत्स्व।
विश्रोदित्यर्थःअथनैमित्तिकंकर्महिपश्रू०जेत्।।पश्रुनामोत्सीयानोयदाउप
तापोआधिरभ्रत्तदाएतमेवदेवंक्षादश्रानामकंचेत्यर्थःनमध्येगोश्चस्ययजेतत
त्रऽज्यमाहृत्यस्थाली०जतंआज्यभागांतंकृत्वाउपस्तीर्यसर्वंनिधायप्रत्यग्निधा १२८
र्यजुऊयादेवंसर्वंजितंकुर्यात्अत्रप्रधानहविषःशेषाभावात्स्विष्टकृन्नका

षंणामकमेकनामकं

र्यःदिगुपस्थानंकार्यमित्युक्तंततःसर्वंप्रायश्चित्तादिसमापयेत्।।बर्हिर्येत्।।त
तोबर्हिश्चआज्यंचश्रोक्षणेनप्रोक्ष्यकृत्वाग्नावनुप्रहृत्यप्रतिधर्मंगाआ
नयेत्।।श्रोता०मियात्।।ततःश्रोतातीयंजपन्पश्रुनामध्यमियान्मध्येविश्रोदि
त्यर्थःअन्येतुश्रोतातिश्रब्दंतिसकृन्निश्रोतातीयश्रब्देनोच्यतइतिव्याचख्युः।।का
नितानिईजेथावाएथिवीइंदरुन्नमेषामुतदेवाअवेहितामित्येतानिश्रोनइंद्रा
ग्नीइतीदंश्रोतातीयमितिप्रसिद्धमित्युक्तमस्माभिःप्राक्अध्यायांतलक्षणार्थंदि
क्वनंनमःश्रोनकायनमःश्रोनकायश्रोनकनमस्कारस्तत्प्रसादेनेदंशास्त्र
मस्माभिःप्रणीतंतच्चसमाप्तमितिज्ञापनार्थंअथबह्वृचाचार्यंतिरप्रतेनसपिंडीक
रणप्रयोगंवक्ष्यामःसौकर्यार्थंतत्तुसंवत्सरेश्रूर्ध्वंद्वादश्राहेवाकार्यंतत्रनियमेन

द्वौब्राह्मणौदैवेपित्र्येतुत्र्यइतरत्सर्वंपार्वणवत्तिरोषमात्रंवक्ष्यामः तत्रचत्वा
र्यर्घ्यपात्राणिएकंश्वेतस्यत्रीणिपित्रपितामहप्रपितामहानांतत्रचतुर्थेपिदर्भानं
तथर्यित्वचतुर्थेप्यपोनिषिञ्चत्वारिसक्रदनुमंत्र्यश्वेतपात्रेत्रीणितिलान्निक्षिप्यत। ल
तोमंत्रेणपित्रपात्रेषुप्रक्षिपतिमंत्राहुतिरुक्तातोगंधमाल्यैश्चत्वार्यपिपात्राणि
अर्चयित्वाततःप्रथमंश्वेतपात्रमितरेषुपित्रादिपात्रेषुत्रिषुनिनयतिसमानीव
आकृतिरित्युचातत्तोर्घ्यनिवेदनादिपार्वणवत्अत्रस्थालीपाकोनास्तीतिकृत्वा
भोजनार्थादन्नाद्यकृत्यंताकृत्वान्नंकुर्यात्पाणिषुवाप्रवेक्ष्यन्विधिनाजुहु
यात्ततोजलतंत्रोषंपित्रभ्यःपाणिषुददातिअग्निहोमपक्षेपाणिहोमपक्षेचसमान १२९
मिदंअन्नंपाणितलेदत्तमितिश्वश्रूश्राद्धनिषेधोऽत्रद्रष्टव्यःपिंडनिर्वपणकालेश्वेतोद्दे

श्येनएकंपिंडंतूष्णींदत्वापित्रादित्रिभ्यःपार्वणवद्दत्वाश्वेतपिंडंत्रिधाविभज्यत्रिषुपिं
डेषुनिदध्यात्मधुमतीर्मधुमतीर्मधुवाताऋतायतइतितिसृभिःसंगच्छध्वमितिद्वाभ्यांचततोनुमं
त्रणादिसर्वंपार्वणवत्ॐस्वस्त्यस्त्वितिब्राह्मणान्विसर्जयेत्एवंचतुर्थस्यअपि
तामहस्यपिंडविच्छेदोभवतिस्त्रियाअप्येवमेवसपिंडीकरणंतस्यास्तुभ्रातृपितामह
प्रपितामहाभिःसपिंडीकरणंएवंसतिचतुर्थ्याःप्रपितामह्याःपिंडविच्छेदोभवति
अनपत्यानांतुश्वेतानांसपिंडीकरणंनास्त्येवंअन्यस्यापियस्यसपिंडीकरणंकार्यंय
स्यनकार्यंयेनकर्त्रीकार्यंयेभ्यश्चपिंडदानंकार्यंतत्सर्वंस्मृतितोवगंतव्यंएवमाचा
र्यंतिरमतेनप्रयोगःसुखार्थमिदमत्रभारद्वाजाश्वलायनगृह्यस्यनाध्यंभगवता
कृतं॥देवस्वामिसमाख्येनविस्तीर्णंतत्समादृतः॥दिवाकरद्विजार्यस्यसूनुनानेधुवेलवै॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

नारायणेनविप्रेणकृतेयंहस्तिगीरुद्गीः॥ इतिश्रीनारायणीयायांहस्तौगण्यविवरणेचतुर्थोध्यायःसमाप्तः॥ संवत्१८०२० वर्षमितिजेष्ठवदीपदीनेसमाप्तः॥८

शकेऽष्टादशविजयनामाब्देथाल्युपनामकनामकनागेशभट्टात्मजश्रीमभट्टस्येदंपुस्तकं॥लक्ष्मीकांतायनमः॥ शाकलकारिकायां॥ब्रह्मचारीगृहस्थश्चजपेदष्टोत्तरंशतं॥वानप्रस्थोयतिर्वापिजपेत्तेद्विगुणंहरुकं॥१॥श्राद्धेदर्शेप्रदोषेचगायत्रीदशसंख्यया॥स्वाध्यायेतुशतंचाष्टोत्तरमध्यायेविंशतिः॥२॥आरभ्यानामिकामूलमंगुष्ठाग्रेणचैवहि॥मध्यमामूलपर्यंतंगायत्र्यागणयेन्नपः॥३॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY